## विकर्णशुङ्गछगलाद् वत्सभरद्वाजात्रिषु (११७/११२०)

विकर्णशुङ्गछगलशब्देभ्यः यथासङ्ख्यं वत्सभरद्वाजात्रिषु अपत्यविशेषेषु अण् प्रत्ययो भवति। वैकर्णो भवति वात्स्यश्चेत्। वैकर्णिः अन्यः। शौङ्गो भवति भारद्वाजश्चेत्। शौङ्गिः अन्यः। छागलो भवति आत्रेयश्चेत्। छागलिः अन्यः। [1]शुङ्गाशब्दं स्त्रीलिङ्गमन्ये पठन्ति, [2]ततो ढकं प्रत्युदाहरन्ति शौङ्गेयः इति। द्वयमपि चैतत् प्रमाणम्, उभयथा सूत्रप्रणयनात्॥

## पीलाया वा। (११८/११२१)

तन्नामिकाणो बाधके द्व्यचः इति ढकि प्राप्ते अण् प्रत्ययः पक्षे विधीयते। पीलायाः अपत्ये वा अण् प्रत्ययो [3]भवति। पीलायाः अपत्यं पैलः, पैलेयः॥

## ढक् च मण्डूकात्। (११९/११२२)

मण्डूकशब्दात् अपत्ये ढक् प्रत्ययो भवति। चकारात् अण् च वा। तेन त्रैरूप्यं भवति। माण्डूकेयः, माण्डूकः, माण्डूकिः॥

## स्त्रीभ्यो ढक्। (१२०/११२३)

स्त्रीग्रहणेन टाबादिप्रत्ययान्ताः शब्दा गृह्यन्ते। स्त्रीभ्योऽपत्ये ढक् प्रत्ययो भवति। सौपर्णेयः। वैनतेयः। स्त्रीप्रत्यय[4]विज्ञापनादसत्यर्थग्रहणे इह न भवति, इडबिडोऽपत्यम् ऐडबिडः, दरदोऽपत्यम् दारदः इति।

[३८८] वडवाया वृषे वाच्ये। (म. भा. २.२५८)

वाडवेयो वृषः [5]स्मृतः। अपत्ये प्राप्तः ततोऽपकृष्य [6]विधीयते। तेनापत्ये वाडवः इति।

[३८९] अण् क्रुञ्चाकोकिलात् स्मृतः। (म. भा. २.२५८)

क्रुञ्चाया अपत्यं क्रौञ्चः। कौकिलः॥

## द्व्यचः। (१२१/११२४)

स्त्रीभ्यः इत्येव। द्व्यचः स्त्रीप्रत्ययान्तादपत्ये ढक् प्रत्ययो भवति। तन्नामिकाणोऽपवादः। दत्ताया अपत्यं दात्तेयः। [7]गौपेयः। द्व्यचः इति किम्? [8]यामुनः॥

## इतश्चानिञः। (१२२/११२५)

स्त्रीग्रहणं निवृत्तम्[9]। चकारो द्व्यचः इत्यस्यानुकर्षणार्थः। इकारान्तात् प्रातिपदिकाद् अनिञन्तादपत्ये ढक् प्रत्ययो भवति। आत्रेयः। [10]नैधेयः। इतः इति किम्? दाक्षिः। प्लाक्षिः। अनिञः इति किम्? [11]दाक्षायणः। [12]प्लाक्षायणः। द्व्यचः इत्येव, मरीचेरपत्यं मारीचः॥

---

1. शुङ्ग° क. 2. ततो नास्ति फ. 3. भवति नास्ति फ. 4. विज्ञानात् फ. ब. 5. स्मृतः नास्ति फ. 6. विधीयते नास्ति फ. 7. गौप्तेयः अ. 8. यमुनायाः अपत्यं इत्यधिकम् फ. 9. चात् द्व्यचः इत्यनुवर्तते इत्यधिकम् फ. 10. जालेयः फ, नास्ति ड. 11. दाक्षेरपत्यं इत्यधिकम् फ. 12. नास्ति फ.